Original Article
ISSN (Online): 2582-7472

ShodhKosh: Journal of Visual and Performing Arts
January-June 2024 5(1), 3364–3376

# A COMPARATIVE STUDY ON VARNASAMAMNAYA-VARNOCCARANAVIDHI BETWEEN RIKPRĀTIŚĀKHYA AND VAJASANEYIPRATISHAKHYA

# ऋक्प्रातिशाख्य-वाजसनेयिप्रातिशाख्ययोस्तुलनात्मकं समीक्षणम्

Arpita Das [1], Dr. Laxminarayan Pandey [2]

[1] Department of Sanskrit, Mansarovar Global University, Sehore, M.P., India
[2] Head of Department, Visual Arts Department, Allahabad University, Prayagraj, India

## ABSTRACT

**English:** Sanskrit is the oldest heart-grabbing language in the world, flawless, endowed with all the required rituals, endowed with all the parts of literature, poetry, dictionary, grammar and others. It is divided into two parts by the difference between Vedic and Sanskrit. Their Vedic language is the oldest. The sages have indeed explained the fourfold nature of the Vedas by distinguishing them from the Ṛg, Sāma, Yajur and Atharva Vedas. According to the śruti, the sixfold Veda is to be studied and understood by a brāhmaṇa as the causeless religion, and the sixfold Veda is to be studied and understood. The limb is the name of the benefactor. These are the limbs that are known as the limbs. The things which help in understanding the nature of the Vedas are called the limbs. There are six parts of the Vedas. They are – Shiksha, Kalpa, Grammar, Nirukta, Chhanda and Jyoti. It is said that the education is the Kalpa, and the grammar is the Nirukta, and the chandas are the Vedas. There are also six parts of the Vedas called Jyotishamayana so far .
Although the Pratiśākhya does not appear to be included in the six Vedic literatures, it is safe to say that this work is as indispensable in the world of Vedic literature as the educational Vedic literature. The Pratiśākhya text also gives knowledge of the verse, syllable, pronunciation process, vowels, etc. of the Vedic mantra. There are many Pratishakhya texts according to the branches of the Prativeda. For example – a) Rigveda-Pratishakhya under the Shakala branch of the Rigveda b) Riktantra under the Kothuma branch of the Samaveda c) Taittiriyapratishakhya under the Taittiriya branch of the Krishna Yajurveda d) Vajsaneyipratishakhya under the Madhyandina branch of the Shukla Yajurveda e) Atharvaveda The four chapters of the Śaunakīya, etc.
Although there appears to be unity in the name, Pratiśākhya, the Vedas are separate. Therefore, the subject of this research paper is a comparative review of the Vajasaneyi Pratishakhya of the Madhyandina branch of the Shukla Yajurveda with the Rigveda Pratishakhya of the Shakala branch of the Rigvega.

**Hindi:** विश्वस्य प्राचीनतमा हृदयग्राहका, निरवद्या, सकलैरपेक्षितैः संस्कारैस्सम्पन्ना, साहित्य-काव्य-कोश-व्याकरणादि सर्वाङ्गैस्समन्विता अनादिकालतः काले काले परमात्मनावतीर्य संरक्षिता महोभिगौरवमण्डितास्ति संस्कृतभाषा । वैदिक-संस्कृतभेदेन सा द्विधा । तयोर्वैदिकभाषा एव प्राचीना । ऋक्-साम-यजुः-अथर्वभेदेन वेदस्य खलु चातुर्विध्यं प्रतिपादितमृषिभिः ।
ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति श्रुतिवाक्यानुसारेण षडङ्गो वेदोऽध्येतव्यो ज्ञातव्यश्चेति । अङ्गं नामोपकारकः । अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि । यानि वस्तूनि वेदानां स्वरूपज्ञाने सहायकानि भवन्ति तान्यङ्गानि कथ्यन्ते । षड्वेदाङ्गानि तत्र सन्ति । तानि तु – शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दः-ज्योतींषि चेति । उक्तम् - शिक्षा कल्पोऽथ व्याकरणं निरुक्तं छन्दसां च यः । ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ।। इति। यद्यपि षट्सु वेदाङ्गेषु प्रातिशाख्यस्यान्तर्भुक्तिर्न स्यात्तथापि ग्रन्थोऽयं वैदिकसाहित्यजगति शिक्षावेदाङ्गवदपरिहार्य इति निश्चप्रचं वक्तुं युज्यते । प्रतिशाख्यग्रन्थेनापि वेदमन्त्रस्य छन्दः-मात्रा-उच्चारणप्रकिया-स्वरादीनां ज्ञानं लभते । प्रतिवेदस्य शाखाभेदेन बहवः प्रातिशाख्यग्रन्थाः सन्ति । तद्यथा – क) ऋग्वेदस्य शाकलशाखान्तर्गतम् ऋग्वेद-प्रातिशाख्यम् ख) सामवेदस्य कोथुमशाखान्तर्गतम् ऋक्तन्त्रम् ग) कृष्णयजुर्वेदस्य तैत्तिरीयशाखान्तर्गतं तैत्तिरीयप्रातिशाख्यम् घ) शुक्लयजुर्वेदस्य माध्यन्दिनशाखान्तर्गतं वाजसनेयिप्रातिशाख्यम् ङ) अथर्ववेदस्य शौनकीया चतुरध्यायिका इत्यादयः ।

**DOI**
10.29121/shodhkosh.v5.i1.2024.6083

**Funding:** This research received no specific grant from any funding agency in the public, commercial, or not-for-profit sectors.

**Copyright:** © 2024 The Author(s). This work is licensed under a Creative Commons Attribution 4.0 International License.

With the license CC-BY, authors retain the copyright, allowing anyone to download, reuse, re-print, modify, distribute, and/or copy their contribution. The work must be properly attributed to its author.

यद्यपि नाम्नि एकता दृश्यते प्रातिशाख्यम् इति तथापि वेदस्तु पृथक् पृथक् । अत एव आधारो यथा पृथक् तथा आधेयोऽपि पृथक् भवतीति कृत्वा ऋग्वेगस्य शाकलशाखान्तर्गतेन ऋग्वेद-प्रातिशाख्येन सह शुक्लयजुर्वेदस्य माध्यन्दिनशाखान्तर्गतस्य वाजसनेयिप्रातिशाख्यस्य वर्णसमाम्नाय-वर्णोच्चारणविधि-वर्णोच्चारणकालविषये तुलनात्मकसमीक्षा एवास्य गवेषणापत्रस्य विषय इति शम् ।।

**Keywords:** Concise Summary, Avatar Anika, Introduction to Rikpratishakhya, Introduction to Vajsaneyipratishakhya, Varnochcharana Vidhi of Ubhayapratishakhya, Comparative Review on Varnasamnaya-Varnochcharanavidhi of Ubhayapratishakhya, Conclusion, List of Abbreviations, Bibliography संक्षिप्तसारः, अवतरणिका, ऋक्प्रातिशाख्यस्य परिचयः, वाजसनेयिप्रातिशाख्यस्य परिचयः, उभयप्रातिशाख्यस्य वर्णसमाम्नायः, उभयप्रातिशाख्यस्य वर्णोच्चारणविधिः, उभयप्रातिशाख्यस्य वर्णसमाम्नाय-वर्णोच्चारणविधिविषये तुलनात्मकं समीक्षणम्, उपसंहारः, शब्दसंक्षेपसूची, ग्रन्थपञ्जी

## 1. प्रस्तावना

वेदाः खलु सन्ति सकलज्ञानविज्ञाननिधयः । सर्वविधं ज्ञानमेषु वेदेषु सन्निहितं विद्यते । न केवलम् आध्यात्मिकमपि तु ऐहिकज्ञानमपि वेदेषु विलसति । विद् ज्ञाने, विद्लृ लाभे, विद् विचारणे, विद् सत्तायाम् इति विद्धातोर्निष्पन्नोऽयं वेदशब्दः । इत्थं वेदशब्देनैव एषां वेदानां सर्वविद्यामयत्वं सकलज्ञाननिधानत्वं सिद्धमस्ति । सर्वविद्यामय्वात् वेदाः सन्ति त्रैकालिकविषयप्रकाशकाः सनातनचक्षुरूपेण प्रसिद्धाः । तदुच्यते भगवता मन्वाचार्येण – पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्[1] इति ।

सोऽयं वेद एव ऋग्यजुःसामाथर्वभेदेन चतुर्धा विभज्यते इति सुविदितमस्ति । प्रतिवेदानामेतेषां शिक्षादीनि वेदाङ्गानि सन्ति इत्यपि सुविदितं सर्वैः विद्वद्भिः तथा पाठकैः । ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति श्रुतिवाक्यानुसारेण षडङ्गो वेदोऽध्येतव्यो ज्ञातव्यश्चेति । षड्वेदाङ्गानि तत्र सन्ति –

शिक्षा कल्पोऽथ व्याकरणं निरुक्तं छन्दसां चयः । ज्योतिषामयनं चेव वेदाङ्गानि षडेव तु ।। इति ।

अत एव षडङ्गानि तु – क) शिक्षा, ख) कल्पः, ग) व्याकरणम् घ) निरुक्तम् ङ) छन्दः, च) ज्योतिषं चेति । मन्त्राणाम् उच्चारणशिक्षणविषये शिक्षायाः, कर्मकाण्डस्य अनुष्ठानाय कल्पस्य, शब्दानां स्वरूपज्ञानाय व्याकरणस्य, वैदिकशब्दानाम् अर्थज्ञानाय निरुक्तस्य, वैदिकच्छन्दसां परिज्ञानाय छन्दसः, अनुष्ठानचितोकालनिर्णयार्थं ज्योतिषशास्त्रस्य उपयोगिता वर्तते । एतेषां षण्णां वेदाङ्गानां महत्त्वं निरीक्ष्यैव ऋग्वेदान्तर्गतायां पाणिनीयशिक्षायामुच्यते -

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।।

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।। [2] इति ।

श्लोकेऽस्मिन् रूपकेणैकेन तेषां वेदाङ्गानामवयवत्वं कल्पितम् । एतत्तु अपि सर्वैर्ज्ञायते ।

एतेषु षट्सु वेदाङ्गेषु प्रातिशाख्यस्य उल्लेखो नास्ति । तथापि तस्य वेदाङ्गत्वं न अनस्वीकार्यम् । ऋगादिभेदेन चातुर्विद्यात् शाखाविशेषे ऊहापोहसम्पादनाय तदीयं विशिष्टं साङ्गोपाङ्गमध्ययनं प्रस्तौति प्रातिशाख्यं नाम । शाखागतविचारेण प्रतिवेदं प्रातिशाख्यानां नानाविध्यात् तत्तद्विषयपरिकल्पनमेतेषु सुविदितमेव । न हि वेदाङ्गं प्रातिशाख्यम्, न हि वेदाङ्गं प्रतिशाख्यम्, समुदायेन शिक्षादिवेदाङ्गानामालोचनाद् वेदाङ्गतरत्वमेव परिगणनसापेक्षत्वात् । शीक्षादीनां पृथक्त्वेन वेदाङ्गत्वात् प्रातिशाख्ये समुदायेन तत्तद्विषयपर्यालोचनत्वात् शास्त्रस्यास्य वेदाङ्गत्वाभावेन परिकीर्तितं वेदाङ्गेतरत्वमेव ।

शिक्षादिना येन केनापि वेदाङ्गेन सामान्येन सम्भवति प्रातिशाख्यगतविषयालोचनम् । शिक्षादिषु वेदाङ्गेषु सामान्यविधयो निर्दिष्टाः, प्रातिशाख्येषु तु तदपवादविधयः । उत्सर्गापवादयोरपवादविधिर्बलीयान् इति न्यायेन प्रातिशाख्यशास्त्रस्य अपवादविषयपरत्वात्, शिक्षादिभ्यो वेदाङ्गेभ्यो विवेचितं बलीयस्त्वम् । अत एव वेदाङ्गतत्वेन किञ्चिदनितरसाधारणं प्रातिशाख्यं नामेति शास्त्रम् । वैदिकसाहित्यपर्यालोचनायाः विशेषतो वैदिकव्याकरणपर्यालोचनायाः क्षेत्रेषु प्रातिशाख्यं खल्वेकमनवद्यशास्त्रं पारिभाषिककार्यक्रमप्रसङ्गात् ।

प्रतिवेदानां प्रातिशाख्यग्रन्थोऽस्ति इति अस्माभिर्ज्ञायते । इदानीं ऋग्वेदान्तर्गतस्य ऋक्प्रातिशाख्यग्रन्थस्य शुक्लयजुर्वेदस्य शुक्लयजुर्वेद-प्रातिशाख्यग्रन्थस्य तथा वाजसनेयिप्रातिशाख्यग्रन्थस्य वर्णसमाम्नाय-वर्णोच्चारणविधि-विषये तुलनात्मकसमीक्षा कर्तव्या ।

[1]मनु.–12.94
[2]पा.शि. – 41- 42

## 2. ऋक्प्रातिशाख्यस्य परिचय

ऋग्यजुस्सामाथर्वेषु चतुर्षु वेदेषु ऋग्वेदस्य प्रातिशाख्यम् एव *ऋक्प्रातिशाख्यम्* । ग्रन्थस्यास्य रचयिता एव आचार्यः शौनकः । ग्रन्थस्यास्य भाष्यकार उवटाचार्यः, भाष्यस्य नाम एव *उवटभाष्यम्* । प्रतिवेदस्य प्रातिशाख्यग्रन्थो विद्यते । तत्र पौर्वापर्यस्तु इत्थम् – 1. ऋग्वेदप्रातिशाख्यम् 2. तैत्तिरीयप्रातिशाख्यम् 3. वाजसनेयिप्रातिशाख्यम् 4. शौनकीया चतुरध्यायिका 5. ऋक्तन्त्रम् 6. अथर्ववेदप्रातिशाख्यम् इति ।

ग्रन्थस्यास्य प्रथमसंस्करणमेव 1859 ख्रीष्टाब्दे एम.ए.रेग्नियर-महोदयेन प्रस्तूयते । तत्र ग्रन्थस्थितानां सूत्राणां फ्रेञ्च-अनुवादः कृतः, अपि च उवटभाष्यमवलम्ब्य सूत्राणां व्याख्याः अपि कृता तत्रभवता एम.ए.रेग्नियर-महोदयेन । ग्रन्थस्यास्य द्वितीयसंस्करणमेव 1869 ख्रीष्टाब्दे मैक्समूलर-महोदयेन प्रस्तूयते । तत्र ग्रन्थस्थितानां सूत्राणां जर्मान-अनुवादः कृतः, अपि च उवटभाष्यमवलम्ब्य सूत्राणां व्याख्याः अपि कृता तत्रभवता मैक्समूलर-महोदयेन । पुनः, ग्रन्थस्यास्य तृतीयसंस्करणमेव 1869 ख्रीष्टाब्दे सत्यव्रतसामश्रमी-महोदयेन प्रस्तूयते । पुनः, ग्रन्थस्यास्य चतुर्थसंस्करणमेव 1903 ख्रीष्टाब्दे उवटभाष्यसहितम् ऋक्प्रातिशाख्यस्य संस्करणं पण्डित-युगलकिशोर-व्यास-महोदयेन तच्छिष्येन पण्डित-प्रभुदत्तृशर्मणा च कृतम् । पुनः, ग्रन्थस्यास्य पञ्चमसंस्करणमेव 1905 ख्रीष्टाब्दे उवटभाष्यसहितम् ऋक्प्रातिशाख्यस्य संस्करणं हितव्रत-सामकण्ठ-महोदयेन कलिकातातः कृतम् । तदनन्तरं डा. मङ्गलदेव-शास्त्री महोदयेन उवटभाष्यसहितस्य ऋक्प्रातिशाख्यस्य खण्डत्रयेण अत्युत्तमं संस्करणमेकं प्रकाशितम् । तत्र प्रथमे खण्डे प्रातिशाख्यस्यास्य कर्ता, भाषा, रचनाशैली आदि प्रतिपादिता । द्वितीये खण्डे उवटभाष्यसहितानि प्रातिशाख्यास्यास्य सूत्राणि समुल्लिखितानि । तृतीये खण्डे तु ग्रन्थस्यास्य आङ्गलभाषायाम् अनुवादः टिप्पनी च सन्निवेशिता तत्रभवता ग्रन्थकारेण । तदनन्तरं 1930 ख्रीष्टाब्दे अध्यापक-सिद्धेश्वर-भट्टाचार्य-महोदयस्य उवट-भाष्य-सहितम् *ऋग्वेदप्रातिशाख्यम्* वाराणस्या: काशी हिन्दू विश्वविद्यालय शोध-प्रकाशनतः प्रकाशितोऽभूत् । तदनन्तरं अध्यापक-वीरेन्द्रकुमाक-वर्मा-महोदयेन अनुवादितं परिष्कृतम् उवटभाष्य-संवलितम् ऋद्वेदप्रातिशाख्यम् प्रकाशितं जातं चौखम्बा-संस्कृत-प्रतिष्ठानतः 1986 ख्रीष्टाब्दे । अध्यापक-व्रजबिहारी-चौवे-महोदय-प्रणीतम् *ऋग्वेगप्रातिशाख्य* (पटल १ – ४) भारतीय विद्या प्रकाशन, दिल्लीतः 1986 ख्रीष्टाब्दे प्रकाशितोऽभूत् । *शौनकीय ऋग्वेगप्रातिशाख्य* (प्रथमतश्चतुर्थपटलं यावत्, षोडशपटलञ्च) अध्यापक-तारकनाथ-अधिकारी-महोदयेन सम्पादितं कोलकातायाः संस्कृत-वुक-डिपोतः 2007 ख्रीष्टाब्दे । तत्परं, *शौनकविचरितम् ऋग्वेदप्रातिशाख्यम्, पशुपतिशास्त्रिकृतटीकासमेतम्* प्रकाशितं सम्पादकेन अनुवादकेन व्याख्याकारेण अध्यापक-अमरकुमार-चट्टोपाध्याय-महाभागेन कोलकातायाः संस्कृत-पुस्तक-भाण्डारतः 2008 ख्रीष्टाब्दे ।

सर्वेषामेव वेदानां सर्वेषु प्रातिशाख्येषु ऋग्वेदीयम् ऋक्प्रातिशाख्यं प्राचीनतानुसारेण प्रामाणिकतानुसारेण विषयविस्तारेण च शीर्षस्थानीयमस्ति । इदमेव ऋग्वेदस्य आश्वलायनशाखासम्बद्धम् । ग्रन्थस्यास्य विशेषता एव – क) ग्रन्थस्यास्य विषयवर्णनाप्रसङ्गे बहवः पारिभाषिकाः शब्दाः व्यवहृताः (प्रवादः, न्यायः, प्रतिकण्ठः, नियतः, प्रत्यय आदि) य एव अन्यत्र न दृश्यन्ते । ख) ग्रन्थेऽस्मिन् अष्टादश-पटलाः सन्ति । प्रतिपटलस्य विषयभेदेन पृथक्पृथक् नामानि सन्ति यदेवान्यत्र न प्राप्यते । ग) चतुर्दशपटले उच्चारण-दोषविषयकानि साङ्गोपाङ्ग-विवरणानि सन्ति, यदेवान्यत्र न दृश्यते । घ) ग्रन्थस्य रचना सूत्रैः विरचिता सत्यपि ग्रन्थस्य अस्पष्टता कृत्रिमता च नास्ति । ङ) ऋग्वेदस्य मन्त्रविषयकाः सर्वाः विशेषेताः प्रातिशाख्येनानेन प्रकाशिताः जाताः तत्रभवता ग्रन्थकारेण ।

## 3. वाजसनेयिप्रातिशाख्यस्य परिचय

ऋग्यजुस्सामाथर्वेषु चतुर्षु वेदेषु यजुर्वेदः खलु कृष्ण-शुक्लभेदेन द्विधा विभज्यते । कृष्णयजुर्वेदस्य प्रातिशाख्यमेव तैत्तिरीयप्रातिशाख्यम् । शुक्लयजुर्वेदस्य प्रातिशाख्यमेव अस्माकमालोच्य शुक्लयजुर्वेदप्रातिशाख्यं वाजसनेयिप्रातिशाख्यं वा । ग्रन्थस्यास्य रचयिता एव शौनकाचार्यस्य शिष्य आचार्यः कात्यायनः । ग्रन्थस्यास्य भाष्यकारौ उवटाचार्य अनन्तभट्टाचार्यः चेति । भाष्यस्य नाम एव यथाक्रमेण *मातृमोदः पदार्थप्रकाशः* चेति ।

आकारदृष्ट्या वाजसनेयिप्रातिशाख्यम् ऋग्वेदप्रातिशाख्यापेक्षया क्षुद्रतरम् । परन्तु प्रातिशाख्यान्तरापेक्षया बृहत्तरम् । प्रातिशाख्येऽस्मिन् अष्टाध्यायाः सन्ति । परन्तु सूत्रसंख्याविषये ग्रन्थस्यास्य मुद्रितेषु संस्करणेषु पार्थक्यमस्ति । तद्यथा –

जीवानन्दस्य संस्करणे सूत्रसंख्या 723, वेङ्कटराम-शर्मणः संस्करणे 726, इन्दु-रास्तोगी-महोदयायाः संस्करणे सूत्रसंख्या 740, वीरेन्द्रकुमार-वर्मणः संस्करणे सूत्रसंख्या 734 । अष्टमाध्यायस्य सूत्रविन्यासे अव्यवस्थाहेतुरत्र सूत्रसंख्या अपि विभिन्ना जाता ।

ग्रन्थस्यास्य बहूनि संस्करणानि सन्ति । तद्यथा –

वि. वेङ्कटरामशर्म-महोदयेन सम्पादितं कात्यायनप्रणीतं वाजसनेयिप्रातिशाख्यं मद्रपुरीविश्वविद्यालयतः1934 ख्रीष्टाब्दे प्रकाशितं जातम् । एस.एन.घोषाल-महोदयेन कात्यायनप्रणीतं वाजसनेयिप्रातिशाख्यं 1964 ख्रीष्टाब्दे Indian Studies : Past & Present इत्यतः प्रकाशितं जातम् । इन्दु-रास्तोगी-महोदयया कात्यायनप्रणीतं वाजसनेयिप्रातिशाख्यं 1967 ख्रीष्टाब्दे चौखम्भा-संस्कृत-संस्थान इत्यतः आङ्गलानुवादेन सह प्रकाशितं जातम् । वीरेन्द्रकुमारवर्म-महोदयेन सम्पादितं कात्यायनप्रणीतं वाजसनेयिप्रातिशाख्यं काशी-हिन्दु-विश्वविद्यालयतः 1975 ख्रीष्टाब्दे प्रकाशितं जातम् ।

प्रातिशाख्यग्रन्थस्यास्य मुख्यवैशिष्टा एव – क) ग्रन्थेऽस्मिन् वर्णसमाम्नायस्य स्पष्टरूपेणोल्लेखनमस्ति । ख) शब्दोत्पत्तेः मूलकारणं शब्दोत्पत्तिप्रक्रिया च सुष्ठुतया समुपवर्णितमत्र । ग) वैदिक-स्वर-सन्धि-क्रमपाठविषये सुष्ठु आलोचना विहिता अत्र । घ) प्रत्यध्यायस्य समाप्तिः ***वृद्धं वृद्धिः***

इति सूत्रेण कृतं तत्रभवता ग्रन्थकारेण कात्यायनाचार्येण । सूत्रस्यास्य भाष्ये उवटाचार्येणोक्तम् – *वृद्धमिदं शास्त्रमन्यानि शास्त्राण्यपेक्ष्य, शिक्षाविहितं व्याकरणविहितं चास्मिन् शास्त्रे उभयं यतः प्रक्रियते । अत एव हेतोः शिष्याणामेतच्छास्त्रश्राविणां बुद्धिर्भवति* इति । अनन्तभट्टमहोदयेनोक्तम् – *वृद्धमिदं शास्त्रं अन्यशास्त्रापेक्षया, यतः शिक्षाविहितं व्याकरणविहितं चोभयमस्मिन् शास्त्रेऽभिधीयते । अतएव हेतोः एतत्पठतां शिष्याणां वृद्धिः ज्ञानाभिवृद्धिर्भवतीति* ।

ग्रन्थस्यास्य रचयिता एव शौनकाचार्यस्य शिष्य आचार्यः कात्यायनः । ग्रन्थस्यास्य भाष्यकारौ उवटाचार्य अनन्तभट्टाचार्यः चेति । उवटाचार्यः आनन्दपुरनिवासिनो वज्रटः पुत्र आसीत् । भोजराज्ञः शासनकाले (1018-1060 ख्रीष्टाब्दः) रचितमिदं भाष्यमिति मन्यन्ते विद्वांसः । उवटाचार्यस्य कृतयस्तु – ऋग्वेदप्रातिशाख्यस्य भाष्यम्, वाजसनेयिप्रातिशाख्यस्य भाष्यम्, शुक्लयजुर्वेदस्य भाष्यम्, ऋक्सर्वानुक्रमण्याः भाष्यम्, ईशावास्योपनिषदो भाष्यम् ।

## **4.** उभयप्रातिशाख्यस्य वर्णसमाम्नाय

वर्णसमाम्नाय इति शब्दोऽयं पुंलिङ्गवाचकः क्लीवलिङ्गवाचकश्चेति । वर्णयति इति व्युत्पत्त्या वर्ण-धातुना सह अच्-प्रत्यययोगेन वर्णः शब्दो निष्पद्यते । तस्यार्थस्तु अक्षरम् इति । अक्षरं नाम स्वरवर्णः ।

समाम्नाय-शब्दस्यार्थस्तु – निरुक्तग्रन्थानुसारेण समाम्नाय-शब्दस्य अर्थ गवादिदेवपत्न्यम्तो वैदिकशब्दसमुदायः । सम्-सम्यक् + आ-मर्यादया-म्नायतेऽभ्यस्यतेऽयमित्यर्थे घञ्-प्रत्यययोगे समाम्नाय-इति शब्दो निष्पन्नो जातः । निरुक्तग्रन्थस्य टीकाकार-दुर्गाचार्यमतेसमभ्यस्यते मर्यादया (पारिपाट्या) अयमिति समाम्नाय इति । समाम्नायः शब्दसमुदायः समाम्नातः संकलित इति आशयः । इदानीं वर्णसमाम्नायो नाम वर्णसमुदायः वर्णसंकलनः वर्णसंग्रह इति यावत् ।

अस्माकं तथा लौकिकसंस्कृतसाहित्ये साधारणतया स्वरवर्णस्य समाम्नायस्तु इत्थम् – अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ए, ऐ, ओ, औ इति । माहेश्वरसूत्रानुसारेण स्वरवर्णानि तु – अ इ उ (अ इ उ ण्) ऋ ऌ (ऋ ऌ क्), ए ओ (ए ओ ङ्), ऐ औ (ऐ औ च्) इति ।

इदानीम् <u>ऋक्प्रातिशाख्यस्य</u> वर्णसमाम्नायः प्रस्तूयते । ऋग्वेदस्य अष्टादशपटलात्मकस्य ऋग्वेदप्रातिशाख्यस्य प्रथमाध्याये तदीयप्रातिशाख्यानुसारं वर्णसमाम्नायः समुपवर्णितः । वर्णो नाम स्वरवर्णाः व्यञ्जनवर्णाश्चेति ।

इदानीं <u>स्वरवर्णानां</u> समाम्नायः प्रस्तूयते । प्रसङ्गेऽस्मिन् तत्रोच्यते – ***अष्टौ समानाक्षराण्यादितः***[3] इति । आशयो यत् आदितः आदौ स्थिता वा अष्टाक्षराणि समानाक्षरसंज्ञकानि भवन्तीति । के तावद्वर्णा इति चेदुच्यते – अ आ ऋ ॠ इ ई उ ऊ इति । अपि च ***ततश्चत्वारि सन्ध्यक्षराण्युत्तराणि***[4] इत्युच्यते तत्रैव । उत्तराणि चत्वारि वर्णानि सन्ध्यक्षरविधायकानि वर्तन्ते । के तावत् सन्ध्यक्षरवर्णा इति चेदुच्यते ए ओ ऐ औ इति । अतएव एतदेव दृश्यते यत् ऋक्प्रातिशाख्यानुसारेण स्वरवर्णसमाम्नाय एवेत्थम् – अ आ ऋ ॠ इ ई उ ऊ ए ऐ ओ औ इति । अर्थात् ***एते स्वराः***[5] इति ।

इदानीं <u>व्यञ्जनवर्णस्य</u> समाम्नायः प्रस्तूयते । प्रसङ्गेऽस्मिन् <u>ऋग्वेदप्रातिशाख्ये</u> उच्यते - ***सर्वः शेषो व्यञ्जनान्त्येव***[6] इति । अर्थात् स्वरानुस्वारव्यतिरिक्तः सर्वः शेषो वर्णराशिः व्यञ्जनसंज्ञको वेदितव्यः इति ।

व्यञ्जनानां वर्णसमाम्नायनिरूपणावसरे तत्र स्पर्शसंज्ञा-वर्गसंख्या-अन्तःस्थासंज्ञा-उष्मसंज्ञाः विहिताः । तत्र

स्पर्शसंज्ञा – ***तेषामाद्या स्पर्शाः***[7] इति सूत्रेण ऋग्वेदप्रातिशाख्ये स्पर्शसंज्ञा विहिता । आशयो यत् तेषां व्यञ्जनानाम् आद्या वर्णाः स्पर्शसंज्ञकाः स्युरिति । स्पर्शाः कादयो मान्ता इति । अर्थात् क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म – एताः वर्णाः स्पर्शसंज्ञकाः वेदितव्या । एते स्पर्शाः पञ्चवर्गाः सन्ति ।[8] अर्थात् पञ्चभिः स्पर्शैर्वर्ग एषामिति पञ्चवर्गाः । यथा – कवर्गः (क ख ग घ ङ), चवर्गः (च छ ज झ ञ), टवर्गः (ट ठ ड ढ ण), तवर्गः (त थ द ध न), पवर्गः (प फ ब भ म) इति ।

अन्तःस्थासंज्ञा - चतस्रोऽन्तस्थास्ततः इति सूत्रेण ऋग्वेदप्रातिशाख्ये अन्तस्थासंज्ञा विहिता । आशयो यत् तेभ्यः स्पर्शेभ्यो अनन्तराः चतस्रो वर्णा अन्तःस्थसंज्ञकाः वेदितव्याः । स्पर्शाणाम् उष्मणाम् अन्तर्मध्ये तिष्ठन्तीति अन्तःस्थाः । ते च – य र ल व इति । अर्थात् यरलवानाम् अन्तःस्थसंज्ञा भवतीति ।

उष्मसंज्ञाः - उत्तरेऽष्टा ऊष्माणः इति सूत्रेण ऋग्वेदप्रातिशाख्ये उष्मसंज्ञा विहिता । आशयो यत् तेभ्य अन्तःस्थेभ्य उत्तरस्थिता अष्टवर्णा उष्मसंज्ञकाः भवन्तीति । तेऽष्टवर्णास्तु – ह श ष स अः जिह्वामूलीयः क उपध्मानीयः प अं इति । अर्थात् ह श ष स अः जिह्वामूलीयः क उपध्मानीयः प अं – एतेषां व्यञ्जनानाम् उष्मसंज्ञा भवतीति ।

---

[3] ऋक्प्रा. – 1.1
[4] ऋक्प्रा. – 1.2
[5] ऋक्प्रा. – 1.3
[6] ऋक्प्रा. – 1.6
[7] ऋक्प्रा. – 1.7
[8] ऋक्प्रा. – 1.8 (पञ्च ते पञ्चवर्गाः)

अतएव ऋग्वेदप्रातिशाख्यानुसारेण व्यञ्जनवर्णानां समाम्नायस्तु एवम् – क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व ह श ष स अः जिह्वामूलीयः क उपध्मानीयः प अं इति । अत एव ऋक्प्रातिशाख्यानुसारेण सप्तत्रिंशत् (37) व्यञ्जनवर्णाः सन्ति ।

इदानीं वाजसनेयिप्रातिशाख्यस्य वर्णसमाम्नायः – अष्टाध्यायसमन्वितस्य वाजसनेयिप्रातिशाख्यस्य अष्टमाध्याये वर्णसमाम्नाय उपदिष्टः । तदुच्यते – ***अथातो वर्णसमाम्नायं व्याख्यास्यामः***[9] इति ।

वाजसनेयिप्रातिशाख्यमते स्वरा एव प्रथमतयोच्यते ।[10] ते एव – ***अ इति आ इति आ३ इति इ इति ई इति ई३ इति उ इति ऊ इति ऊ३ इति ऋ इति ॠ इति ॠ३ इति ऌ इति ॡ इति ॡ३ इति*** इति ।[11] तदनन्तरं सन्ध्यक्षराणि[12] – ***ए इति ए३ इति ऐ इति ऐ३ इति ओ इति ओ३ इति औ इति औ३ इति*** इति ।[13] एतदेव स्वरवर्णाः ।[14]

वाजसनेयिप्रातिशाख्यानुसारं व्यञ्जनवर्णानां समाम्नायः – व्यञ्जनवर्णानां समाम्नायप्रदर्शनावसरे सूत्रितम् – ***अथ व्यञ्जनानि***[15] इति । व्यञ्जनानां वर्णसमाम्नायनिरूपणावसरे तत्र स्पर्शसंज्ञा-अन्तःस्थासंज्ञा-उष्मसंज्ञा-अयोगवाहसंज्ञा-अनुस्वाराः विहिताः । तत्र -

स्पर्शसंज्ञा – स्पर्शसंज्ञाकथनावसरे प्रथमतया स्पर्शवर्णानि उल्लिखातानि, तत्परं तेषां संज्ञा विहिता । स्पर्शवर्णास्तु –***किति खिति गिति घिति ङिति कवर्गः । चिति छिति जिति झिति ञिति चवर्गः । टिति ठिति डिति ढिति णिति टवर्गः । तिति थिति दिति धिति निति तवर्गः । पिति फिति बिति भिति मिति पवर्गः ।।***[16] इति । वर्णानामुल्लेखनात् परमुच्यते ***इति स्पर्शाः***[17] इति ।

अन्तःस्थासंज्ञा – ***अथ अन्तःस्था***[18] इति सूत्रेण वाजसनेयिप्रातिशाख्ये अन्तःस्थवर्णा विहिताः । ते च – य र ल व इति । तदर्थं सूत्रितम् – ***यिति रिति लिति विति***[19] इति ।

उष्मसंज्ञा – अथोष्माणः[20] इति सूत्रेण तत्र उष्मसंज्ञा विहिता । ते च – श ष स ह इति । तदर्थं सूत्रितम् - ***शिति षिति सिति हिति***[21] इति ।

अयोगवाहसंज्ञा – वाजसनेयिप्रातिशाख्यानुसारेण नव वर्णा अयोगवाहसंज्ञकाः सन्ति । ते च – जिह्वामूलीयः कः, उपध्मानीयः पः, अं, अः, हुँ, कुँ, खुँ, गुँ, घुँ इति । नवानां वर्णानां कृते षट् सूत्राणि सन्ति । ते च यथाक्रमेण – ***क इति जिह्वामूलीयः, प इत्युपध्मानीयः, अं इत्यनुस्वारः, अः इति विसर्जनीयः, हुँ इति नासिक्यः, कुँ खुँ गुँ घुँ इति यमाः***[22] इति ।

अयोगवाहो नाम अकारादिना वर्णसमाम्नायेन सहिताः सन्त एते वहन्त्यात्मलाभं प्राप्नुवन्त्ययोगवाहाः इति । अत एव वाजसनेयिप्रातिशाख्यानुसारं व्यञ्जनवर्णानां समाम्नाय इत्थम् - क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह जिह्वामूलीयः क उपध्मानीयः प अं इति । अत एव वाजसनेयिप्रातिशाख्यानुसारेणापि सप्तत्रिंशत् (37) व्यञ्जनवर्णाः सन्ति ।

इदानीं प्रश्नो मनसि जायते यत् व्यञ्जनवर्णानां समाम्नाये कथं अः हुँ कुँ खुँ गुँ घुँ इति न सन्ति ? उत्तरमपि तत्रैव प्रातिशाख्ये अस्ति । परन्तु न तु अष्टमे पटले, तत्तु अस्ति प्रथमे पटले । तत्र सूत्रितम् - ***व्यञ्जनं कादि***[23] इति । सूत्रस्यास्य भाष्ये उवटमहोदयेनोच्यते – ***(कादि=) ककारादिः, अनुस्वारान्तं यद्वर्णजातं; तत्; व्यञ्जनम् = व्यञ्जनसंज्ञम्; भवति । कितिखितिगितिघितिङिति (8.8) इत्यादि अं इत्यनुस्वारः (8.21) इत्यतदन्तम्***[24] इति । पुनश्च अनन्तभट्टभाष्ये उल्लिखितम् – ***ककारादि अनुस्वारान्तवर्णजातं व्यञ्जनसंज्ञं स्यात्***[25] इति । तदर्थं अः हुँ कुँ खुँ गुँ घुँ – इत्येतेषां वर्णानां व्यञ्जनवर्णसमाम्नाये उल्लेखो नास्ति इति ।

उभयप्रातिशाख्यस्य वर्णोच्चारणविधि अष्टादशपटलात्मकस्य ऋग्वेदप्रातिशाख्यस्य शिक्षा-पटलम्-नामके त्रयोदशेऽध्याये केवलं पञ्चविंशतिसूत्रैः (13.1-6, 8-13, 15-17, 20, 22-27, 37-39), चतुर्दशपटले च (14.40, 47, 52-57, 65-66) एकादशसूत्रैः वर्णोच्चारणविधयो निर्दिष्टाः सन्ति । ग्रन्थस्यास्य संज्ञा-परिभाषा-नामके प्रथमपटले एकादशसूत्रैः (1.38-48) स्वरव्यञ्जनानाम् उच्चारणस्थानानि निर्दिष्टानि परन्तु अष्टादशात्मकस्य

[9] शु.प्रा. – 8.1
[10] शु.प्रा. – 8.2 (तत्र स्वराः प्रथमम्)
[11] शु.प्रा. – 8.3
[12] शु.प्रा. – 8.4 (अथ सन्ध्यक्षराणि)
[13] शु.प्रा. – 8.5
[14] शु.प्रा. – 8.6 (इति स्वराः)
[15] शु.प्रा. – 8.7
[16] शु.प्रा. – 8.8-12
[17] शु.प्रा. – 8.13
[18] शु.प्रा. – 8.14
[19] शु.प्रा. – 8.15
[20] शु.प्रा. – 8.16
[21] शु.प्रा. – 8.17
[22] शु.प्रा. – 8.19-24
[23] शु.प्रा. – 1.47
[24] शु.प्रा. – 1.47 (उवटभाष्यम्)
[25] शु.प्रा. – 1.47 (अनन्तभट्टभाष्यम्)

वाजसनेयिप्रातिशाख्यस्य प्रथमाध्यायस्य प्रायः षट्षष्टिसूत्रैः (1.5-15, 29-84), चतुर्थाध्यायस्य चतुर्भिः सूत्रैः (4.17, 144-146) वर्णोच्चारणविधयो निर्दिष्टाः सन्ति इति । प्रथमतया अत्र ऋग्वेदप्रातिशाख्यस्य वर्णोच्चारणविधय आलोचनीयाः तदनन्तरं वाजसनेयिप्रातिशाख्यस्य वर्णोच्चारणविधय आलोचनीया इति ।

## 5. ऋग्वेदप्रातिशाख्यस्य वर्णोच्चारणविधय

प्रातिशाख्येऽस्मिन् प्रतिवर्णानाम् उच्चारणस्थानानि उल्लिखितानि । तद्यथा –

कण्ठे भवः कण्ठ्यः । अकार-आकारयोः उच्चारणस्थानः कण्ठ्य इति सिद्धान्तः । तदुच्यते - ***कण्ठ्योऽकारः.***[26] इति ।

***उत्तरेऽष्टा ऊष्माणः***[27] इति नियमेन प्रातिशाख्येऽस्मिन् ऊष्मवर्णाः निर्दिष्टाः । ऋग्वेदप्रातिशाख्यानुसारेण व्यञ्जनवर्णानां समाम्नायस्तु एवम् – क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व ह श ष स अः जिह्वामूलीयः क उपध्मानीयः प अं इति । व्यञ्जनवर्णेषु एतेषु ह-कारात् अं-पर्यन्ताः अष्टवर्णाः ऊष्मसंज्ञकाः वेदितव्याः । ऊष्मवर्णेषु एतेषु हकारः अः इति द्वौ वर्णौ कण्ठस्थानगतौ इति । उत्यते – ***प्रथमपञ्चमौ च द्वा ऊष्मणाम्***[28] इति । परन्तु केचिदाचार्या एतौ हकारविसर्जनीयौ उरःस्थानौ इति मन्यन्ते ।[29]

ऋ-ॠकारौ, ऌ-ॡकारौ, जिह्वामूलीयः कः, कवर्गस्य पञ्चवर्णाश्चेति सर्वे वर्णाः जिह्वामूलस्थानाः भवन्ति । तदुच्यते – ***ऋकारल्कारावथ षष्ठ ऊष्मा जिह्वामूलीयाः प्रथमश्च वर्गः.***[30] इति ।

तालव्यवर्णास्तु ए-ऐकारौ, चवर्गः, इ-ईकारौ, यकारः शकारश्चेति । तदुच्यते – ***तालव्यावेकारचकारवर्गाविकारैकारौ यकारः शकारः.***[31] इति ।

षकारः टवर्गीयाः वर्णाश्च मूर्धन्यवर्णाः भवन्ति । सूत्रितं तु ***मूर्धन्यौ षकारटकारवर्गौ***[32] इति ।

तवर्गीयाः पञ्चवर्णाः, सकाररेफलकाराश्च दन्तमूलस्थानगताः भवन्ति । तदुच्यते – ***दन्तमूलीयस्तुतकारवर्गः,.***[33] ***सकाररेफलकाराश्च.***[34] इति ।

***रेफं बस्र्व्यमेके.***[35] इति नियमोऽपि तत्रास्ति । बर्स्वशब्देन दन्तमूलादुपरिष्टादुच्छूनः प्रदेशः इति । बर्स्वे भवः बस्र्व्य इति । एके आचार्या रेफम् बर्स्व्यम् इच्छन्ति इति ।

नासिक्यवर्णान् विहाय शेषो वर्णराशिः ओष्ठस्थानगता इति वेदितव्याः । अत एव उ ऊ ओ औ प फ ब भ म व उपध्मानीय-पः इति वर्णाः ओष्ठस्थानगताः भवन्ति । तदुच्यते – ***शेष औष्ठ्योऽपवाद्य नासिक्यान्.***[36] इति ।

वर्णनिष्पत्तौ प्रयत्नश्च द्विविधः कर्तव्यः – आभ्यन्तरप्रयत्नः बाह्यप्रयत्नश्चेति । प्रयत्नो नाम प्रकृष्टयत्नः । अत्र प्रयत्नो नाम वर्णोत्पत्त्यर्थम् अनुकूलव्यापारविशेष इति ।

आभ्यन्तरप्रयत्नो नाम – वर्णोत्पत्तेः प्राक् अनुकूलव्यापारविशेषः । स तु चतुर्धा विभज्यते – स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात् । तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्, ईषत्स्पृष्टमन्तःस्थानाम्, विवृतमूष्मणां स्वराणां च, ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्, प्रक्रियादशायां तु विवृतमेव ।

बाह्यप्रयत्नो नाम – वर्णोत्पत्तेः परम् अनुकूलव्यापारविशेषः । बाह्यप्रयत्नस्तु एकादशधा – विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितश्चेति । तत्र वर्गाणां प्रथमद्वितीयाः खयस्तथा तेषामेव यमाः, जिह्वामूलीयोपध्मानीयौ विसर्गः शषसाश्च इत्येतेषां विवारः श्वासोऽघोषश्च । अन्येषां तु संवारो नादो घोषश्च । वर्गाणां प्रथमतृतीयपञ्चमाः प्रथमतृतीययमौ यरलवाश्चाल्पप्राणाः । अन्ये वर्णाः महाप्राणा इति । यद्यपि बाह्यप्रयत्नाश्च सवर्णसंज्ञायामनुपयुक्ताः तथापि आन्तरतम्यपरीक्षायामुपयोक्ष्यन्त इति बोध्यम् ।

वर्णनिष्पत्तौ तथा वर्णोच्चारणसमये बाह्यप्रयत्नविषये ऋक्प्रातिशाख्यं निगदति -

---

[26] ऋक्प्रा. – 1.38
[27] ऋक्प्रा. – 1.10
[28] ऋक्प्रा. – 1.39
[29] ऋक्प्रा. – 1.40 (केचिदेता उरस्यौ)
[30] ऋक्प्रा. – 1.41
[31] ऋकप्रा. – 1.42
[32] ऋक्प्रा. – 1.43
[33] ऋक्प्रा. – 1.44
[34] ऋक्प्रा. – 1.45
[35] ऋक्प्रा. – 1.46
[36] ऋक्प्रा. – 1.47

***वायुः प्राणः कोष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते वा ।***

***आपद्यते श्वासतां नादतां वा वक्त्रीहायाम् ।।*** [37] इति ।

पूर्वपक्षिणः कथयन्ति – ये खलु आचार्याः वाण्योत्पादने उद्युक्तो वायुः उदान इति मन्यन्ते तेषां कृते शास्त्रमिदं न सिद्धम् उदानाभावात् । सिद्धान्तपक्षिणः कथयन्ति – तेषां कृते च शास्त्रमिदं सिद्धम् । शारीराणां पञ्चानामपि प्राण इति नाम साधारणम् । तस्मात्तेषामपि ***वायुः प्राणः कोष्ठ्यमनुप्रदानम्*** इत्येवं सिद्धम् ।

अत एव प्राणो वायुः । कोष्ठं नाम उदरम् । कोष्ठे भव कोष्ठ्यम् । अनुप्रदानं नाम वायुमनुप्रदीयत इत्यनुप्रदानम् इति । अनुप्रदानं किमिति चेदुच्यते श्वासनादोऽभयम् इति । केन प्रयत्नेन किमनुप्रदानम् आपद्यते इति चेदुच्यते कण्ठस्य गलस्य च बिले छिद्रे विवृते विपुले सति संवृते संकुचिते वा सति शासत्वं नादत्वं वा आपद्यते ।

विवृतसंवृतौ उभौ कण्ठबिले समे सति वायुः श्वासं नादं चापद्यते ।[38] एतयोः श्वास-नादयोर्मेलनं वर्णानां प्रकृतयस्तथा मूलकारणं भवतीति । तदुच्यते – ***ता वर्णानां प्रकृतयो भवन्ति*** [39] इति ।

एतयोर्मध्ये श्वास एव अघोषवर्णानां प्रकृतिर्भवतीति वेदितव्यम् ।[40]

नादस्तु इतरेषां वर्णानां प्रकृतिर्भवति ।[41]

सोष्मोवर्णानां घोषवर्णानां च प्रकृतिर्भवति श्वासनादौ उभयौ इति ।[42] एतावदेव वर्णनिष्पत्तौ बाह्यः प्रयत्न इति ।

इदानीम् वर्णोच्चारणे आभ्यन्तरप्रयत्नः वर्णनीयः । ऋक्प्रातिशाख्यानुसारम् आभ्यन्तरप्रयत्नो नाम विशेषः करणः । तदुच्यते ***तद्विशेषः करणम्***[43] इति । तत्र आभ्यन्तरप्रयत्नविषये नियमास्तु एवम् –

क) कादिमान्तानां स्पर्शवर्णानाम् आभ्यन्तरप्रयत्न अस्थितम् इति वेदितव्यम् । अस्थितं नाम यत्र वर्णोच्चारणस्थानमधिकृत्य आश्रित्य वा मध्ये जिह्वा न सन्तिष्ठते तत् अस्थितम् इति । तर्हि उच्यते – ***स्पृष्टमस्थितम्***[44] इति ।

ख) ऋग्वेदप्रातिशाख्यानुसारेण यरलवानाम् इति चतुर्णाम् अन्तःस्थवर्णानाम् आभ्यन्तरप्रयत्नः दुस्पृष्टं तथा ईषत्स्पृष्टं भवतीति । तदुच्यते – ***दुष्पृष्टं तु प्राग्घकाराच्चतुर्णाम्***[45] इति । दुष्पृष्टं नाम ईषत्पृष्टम् इति उवटभाष्यम् ।

ग) स्वरवर्णानां, ऊष्मवर्णानां, अनुस्वारस्य च आभ्यन्तरप्रयत्नः स्थितं तथा अस्पृष्टं भवति । यत्र वर्णोच्चारणस्थानमाश्रित्य जिह्वावतिष्ठते तत्स्थितमित्युच्यते । स्थितं नाम अस्पृष्टम् इति उवटभाष्यमतम् । सूत्रमिदं वर्तते तत्र – ***स्वरानुस्वारोष्मणामस्पृष्टं स्थितम्*** [46] इति ।

घ) परन्तु एके आचार्याः कण्ठ्यवर्णानां, ऊष्मवर्णानां चाभ्यन्तरप्रयत्नः स्थितं तथा अस्पृष्टमिति न मन्यन्ते । स्पृष्टं दुःस्पृष्टं वा तेषां मतम् । सूत्रितं तु – ***नैके कण्ठ्यस्य स्थितमाहुरूष्मणः***[47] इति । कतिपया आचार्याः तत्र ***नैके । अकण्ठ्यस्य*** इति मतं पोषयन्ति । तन्मतानुसारेण कण्ठ्यवर्णान् विहाय केवलमूष्मवर्णानामाभ्यन्तरप्रयत्नः स्पृष्टं दुःस्पृष्टं वा भवति, अस्पृष्टं न भवतीति ।

पुनः, वर्गे वर्गे (क-वर्गे, च-वर्गे, ट-वर्गे, त-वर्गे, प-वर्गे) तुल्यस्थानानां समानोच्चारणस्थानानां तुल्यप्रयत्नानामपि तथा आभ्यन्तरप्रयत्नानामपि प्रथमतृतीयवर्णानां श्रूयमाणस्वरूपौ भेदो दृश्यते अनुप्रदानात् बाह्यप्रयत्नात् इत्यर्थः । यथा – क च ट त प ग ज ड द ब इति । एतेषु क-ग-कारयोः आभ्यन्तरप्रयत्नः स्पृष्टः, परन्तु उभययोः बाह्यप्रयत्नस्तु भिन्नः । क-वर्णस्य बाह्यप्रयत्नः श्वासः, ग-इत्यस्य नादश्चेति । एवमन्यत्रापि गणनीयः ।

अस्मिन्नेव प्रातिशाख्ये सघोषाणाम् अनुनासिकानां सोष्मणां चोत्पत्तिविषये मतभेदः प्रदर्शितः । प्रसङ्गेऽस्मिन् अघोष-घोष-सघोष-घोषवत्-अनुनासिक-ऊष्म-सोष्मवर्णानां ज्ञानम् आवश्यकमेव । तत्र –

---

[37] ऋक्प्रा. – 13.1
[38] ऋक्प्रा. – 13.2 (उभयं वान्तरोभौ)
[39] ऋक्प्रा. – 13.3
[40] ऋक्प्रा. – 13.4 (श्वासोऽघोषाणाम्)
[41] ऋक्प्रा. – 13.5 (इतरेषां तु नादः)
[42] ऋकप्रा. – 13.6 (सोष्मोष्मणां घोषिणां श्वासनादौ)
[43] ऋक्प्रा. – 13.8
[44] ऋक्प्रा. – 13.9
[45] ऋक्प्रा. – 13.10
[46] ऋक्प्रा. – 13.11
[47] ऋक्प्रा. – 13.12

अघोषः - प्रतिवर्गाणां प्रथम-द्वितीयवर्णौ, ऊष्मवर्णाश्च अघोषसंज्ञकाः वेदितव्याः । सूत्रितं तु ***अन्त्याः सप्त तेषामघोषाः***[48] इति । ऋग्वेदप्रातिशाख्यानुसारेण व्यञ्जनवर्णानां समाम्नायस्तु एवम् – क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व ह श ष स अः जिह्वामूलीयः क उपध्मानीयः प अं इति । एतेषु व्यञ्जनवर्णेषु अन्त्याः सप्तवर्णाः अघोषसंज्ञकाः वेदितव्याः । तथा च - श ष स अः जिह्वामूलीयः क उपध्मानीयः प अं इति अघोषवर्णाः । अपि च ***वर्गे वर्गे च प्रथमावघोषौ***[49] इति सूत्रेण कख-चछ-टठ-तथ-पफ-इति वर्णानां चाघोषसंज्ञा भवतीति ।

घोषः सघोषो घोषवद् वा – ***पारिशेष्यादन्यानि घोषवत्संज्ञकानि व्यञ्जनानि***[50] इति उवटभाष्यानुसारेण गघङ-जझञ-डढण-दधन-बभम-यरलव-ह-इति व्यञ्जनानां घोषः सघोषो घोषवतसंज्ञाः भवन्ति ।

अनुनासिकः - ***अनुनासिकोऽन्त्यः***[51] इति सूत्रेणात्र अनुनासिकवर्णाः निर्दिष्टाः सन्ति । आशयो यत् प्रतिवर्गम् अन्त्यो वर्णः अनुनासिकसंज्ञो वेदितव्यः । यथा – ङ ञ ण न म इति ।

ऊष्माणः – ऊष्मा नाम वायुः । ***उत्तरेऽष्टा ऊष्माणः***[52] इति नियमेन ऊष्मवर्णाः निर्दिष्टाः । ऋग्वेदप्रातिशाख्यानुसारेण व्यञ्जनवर्णानां समाम्नायस्तु एवम् – क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व ह श ष स अः जिह्वामूलीयः क उपध्मानीयः प अं इति । व्यञ्जनवर्णेषु एतेषु ह-कारात् अं-पर्यन्ताः अष्टवर्णाः ऊष्मसंज्ञकाः वेदितव्याः ।

सोष्मः – ऊष्मा नाम वायुः, तेन सह वर्तन्त इति सोष्माणः । प्रतिवर्गे युग्मौ द्वितीयचतुर्थौ वर्णौ सोष्माणौ वेदितव्यौ । तदुच्यते - ***युग्मौ सोष्माणौ***[53] इति । यथा – खघ-छझ-ठढ-थध-फभ इति ।

इदानीं, अनुस्वारस्योच्चारणविषये आचार्यस्य व्याळेर्मतम् – ***व्याळेर्नासिक्यमनुनासिकं वा***[54] इति । आशयो यत् – तन्मतानुसारेण अनुस्वारो नासिकास्थानगतो मुखनासिकास्थानगतस्तथा अनुनासिकस्थानकगतो वा भवति । यथा –नासिक्यपक्षे – ***त्वं राजेन्द्रः***,[55] ***त्वां राजानम्***[56] इति । आनुनासिक्यपक्षे – ***त्वँ राजेन्द्रः, त्वाँ राजानम्*** इति ।

सन्ध्यक्षराणामुच्चारणविधिः – ए ऐ ओ औ – इति चतुर्णां सन्ध्यक्षराणाम् उच्चारणविधि इदानीं प्रस्तूयते – ***सन्ध्यानि सन्ध्यक्षराण्याहुरेके द्विस्थानतैतेषु तथोभयेषु***[57] इति । आशयो यत् यथा अन्यानि अक्षराणि स्वयमुत्पद्यन्ते न तथा इमानि सन्ध्यक्षराणि । कथमेतदध्यवसीयते इति चेदुच्यते – तेषां द्विस्थानता एव कारणम् । द्विस्थानता नाम – कण्ठतालुस्थानता कण्ठोष्ठस्थानता चेति । ***तालव्यावेकारचकारवर्गाविकारैकारौ यकारः शकारः***[58] इति सूत्रेण ए-ऐकारयो उच्चारणस्थानः तालु इति । ***शेष ओष्ठ्योऽपवाद्य नासिक्यान्***[59] इति सूत्रेण ओ-औकारयो उच्चारणस्थान ओष्ठ इति । तत्र अ इ = ए, अ उ = ओ, अ ए = ऐ, अ ओ = औ इति । अ-वर्णस्य उच्चारणस्थान एव कण्ठः । अत एव ए-ऐकारयो उच्चारणस्थान एव कण्ठतालुः । ओ-औकारयोः उच्चारणस्थान एव कण्ठोष्ठः । एतदनुसारेण सन्ध्यक्षराणां उच्चारणस्य द्विस्थानता परिगणिता ।

अनुनासिकस्थाने अनुस्वारोच्चारणविषये ऋक्प्रातिशाख्यं सूत्रयति - ***स्पर्शोष्मसन्धीन् स्पशरिफसन्धीनभिप्रायाँश्च परिपादयन्ति***[60] इति । स्पर्शोष्मसन्धि-स्पर्शोरेफसन्धि-विषये गवेषणासन्दर्भस्यास्य पञ्चमाध्याये द्रष्टव्यः । विवृत्त्यभिप्रायस्तु चतुर्थाध्याये पारिभाषिकशब्दसमूहेषु द्रष्टव्यः । इदानीं सूत्रस्यास्याशयो यत् *चरति, चक्रे, चमसान्, च, चो, चित्, चरसि, च्यौत्नः, चतुरः, चितिक्वान्* – इति पदानि[61] स्पर्शोष्मसन्धीन्, स्पशरिफसन्धीन्,

---

[48] ऋक्प्रा. – 1.11
[49] ऋक्प्रा. – 1.12
[50] ऋक्प्रा. – 1.12 (उवटभाष्यम्)
[51] ऋक्प्रा. – 1.14
[52] ऋक्प्रा. – 1.10
[53] ऋक्प्रा. – 1.13
[54] ऋक्प्रा. – 13.37
[55] ऋ. – 1.174.1
[56] ऋ. – 2.1.8
[57] ऋक्प्रा. – 13.38
[58] ऋक्प्रा. – 1.42
[59] ऋक्प्रा. – 1.47
[60] ऋक्प्रा. – 14.37
[61] ऋक्प्रा. – 4.73

विवृत्यभिप्रायेषु अभिप्रायान् परिपादयन्ति तथा अनुस्वारं कुर्वन्ति इति, यद्यपि स एव दोषः । उदाहरणं यथा – ***ताँस्ते अश्याम***[62] इति । ***रश्मीँ रिव***[63] इति । ***पीवोअन्नाँ रयिवृधः***[64] इति ।

अविद्यमानस्य ह्रस्वस्वरस्योच्चारणम् अपि ऋक्प्रातिशाख्ये विहितम् । तत्र नियमोऽयं परिलक्ष्यते –

***ऊष्मान्तस्थाप्रत्ययं रेफपूर्वं ह्रस्वं लुम्पन्त्याहुरथाप्यसन्तम् ।***
***पुरुषन्तिं पुरुवारार्यमाष्ट्र्यां हरियोजनाय हरियूपीयानाम् ।।***[65] *इति ।*

आशयो यत् उष्मप्रत्ययम् अन्तःस्थाप्रत्ययं च रेफात्परम् अविद्यमानं ह्रस्वस्वम् उत्पादयन्ति । अयमेव दोषरूपेण परिगण्यते इति कृत्वा तत्तु परित्यजनीयम् । उदाहरणं यथा – ***अर्यमा याजयज्जनः***[66] इति । ***आष्ट्र्यां पदं कृणुते अग्निधाने***[67] इति । उदाहरणद्वये ह्रस्वस्वरस्य आगमनं भवति, यथा – ***अर्यमा*** = ***अरयमा***, ***आष्ट्र्यां*** – ***आष्ट् रयाम्*** इति ।

अविद्यमानस्य यकारस्योच्चारणम् – यकारादन्यः तालुस्थानवर्णः यदि व्यञ्जनादुत्तरो भवति, तर्हि तत्र अविद्यमानो यकार आहुः । तत्र नियमोऽस्ति – तालुस्थानो व्यञ्जनादुत्तरश्चेदयकारस्तत्र यकारमाहुः । शुनः शेपः शास्सि ववर्जुषीणामत्के विरप्शीति निदर्शनानि ।।[68] इति । उदाहरणं यथा – शुनःशेपो यमह्वद् गृभीतः[69] इति । प्रपाकं शास्सि प्र दिशो विदुष्टरः[70] इति । विशां ववर्जुषीणाम्[71] इति । आ जामिरत्के अव्यत[72] इति । विरप्शी गोमती मही[73] इति । अत्र शुनःशेपो - शुनःश्येपः, शास्सि - शास्स्यि, ववर्जुषीणाम् - ववर्ज्युष्यीणाम्, अत्के - अत्क्ये, विरप्शी - विरप्श्यी इति ।

अविद्यमानस्य ऊष्मण उच्चारणम् – हकारेण सोष्मभिश्च उपहितात् यकाराद्वकाराद्वा सर्वे ऊष्मभिः सोष्मभिश्चोपहितात् पूर्वं तेषां समानस्थानम् ऊष्माणमाहुः । एतदेव दोषतया परिगण्यते । यथा – तुच्छ्यान्कामान्करते सिष्विदानः[74] इति । पश्वा स दध्या यो अघस्य धाता[75] इति । आपृच्छ्यं धरुणं वाज्यर्षति[76] इति । पुरुहूतो यः

पुरुगूर्त ऋभ्वा[77] इति । तत्र देवाँ उप ह्वये[78] इति । शतचक्रं योऽह्यो वर्तनिः[79] इति । तुच्छ्यान् – तुच्छश्यान् । एवमन्यत्रापि । विषयेऽस्मिन् नियमोऽस्ति – हकारसोष्मोपहिताद्यकाराद्वकाराद्वा सर्वसोष्मोष्मपूर्वात् । तत्सस्थानं पूर्वमूष्माणमाहुस्तुच्छ्यान्दध्या आपृच्छ्यमृभ्वा ह्वयेऽह्यः[80] इति ।।

ऋृ) अधिकयमस्योच्चारणम् - विषयेऽस्मिन् नियमोऽस्ति – ***पकारवर्गोपहिताच्च रक्तादन्यं यमं तृप्णुताप्नानमौभ्नात् ।।***[81] इति । आशयो यत् – पवर्गेणोपहितात् रक्तात् अनुनासिकात् पूर्वमन्यं यमं तथा अधिकं यममाहुः । अधिकयमोच्चारणं दोषतया परिगण्यते, अत एव एतत्तु वर्जनीयम् । यथा – ***समु तृप्णुत ऋभवः***[82] इति । ***आप्नानं तीर्थं क इह प्र वोचत्***[83] इति । ***दृळ्हा न्यौभ्नादुशमान ओजः***[84] इति । ***तृप्णुत – तृप्ण्णुत*** । एवमन्यत्रापि ।

---

[62] ऋ.- 9.91.5
[63] ऋ. – 8.35.21
[64] ऋ. - 7.91.3
[65] ऋक्प्रा. – 14.40
[66] ऋ. – 1.136.3
[67] ऋ. – 10.165.3
[68] ऋक्प्रा. – 14.47
[69] ऋ. – 1.24.12
[70] ऋ. 1.31.14
[71] ऋ. – 1.134.6
[72] ऋ. – 9.101.14
[73] ऋ. – 1.8.8
[74] ऋ. – 5.42.10
[75] ऋ. – 1.123.5
[76] ऋ. – 9.107.5
[77] ऋ. – 6.34.2
[78] ऋ. – 1.13.12
[79] ऋ. – 10.144.4
[80] ऋक्प्रा. – 14.52
[81] ऋक्प्रा. – 14.53
[82] ऋ. – 1.110.1
[83] ऋ. – 10.114.7
[84] ऋ. – 4.19.4

ऌ) स्वरोपधादनुनासिकात्पूर्वमनुस्वारस्योच्चारणम् – ***अनुस्वारमुपधां वान्यवर्णां स्वरोपधात्सोष्मयमोदयश्चेत्***[85] इति नियमोऽत्रास्ति । ***पकारवर्गोपहिताच्च रक्तादन्यं यमं तृप्णुताप्रानमौभ्नात् –*** इति पूर्ववर्तिसूत्रतः रक्तादिति पदमनुवर्तते अत्र । पुनः - ***हकारसोष्मोपहिताद्यकाराद्वकाराद्वा सर्वसोष्मोष्मपूर्वात् । तत्सस्थानं पूर्वमूष्माणमाहुस्तुच्छ्यान्दध्या आपृच्छ्यमृभ्वा ह्वयेऽह्यः-*** सूत्रतः ***तत्स्थानं पूर्वम्*** इत्यतः पूर्वमित्यनुवर्तते । अत एव सूत्रस्याशयो यत् – स्वरोपधात् रक्तात्पूर्वम् अनुस्वारमाहुः । अपि च, स रत्कवर्णः सोष्मदयो वा यमादयो वा यदि भवेत् तर्हि उपधाम् अन्यवर्णाम् कारयति । तौ दोषौ परिहरेत् । यथा – ***नकिष्टङ् घ्नन्त्यन्तितो न दूरात्***[86] इति । ***गोभिरञ्जमो मदाय कम्***[87] इति । ***पवमानस्य जङ्घ्नतः***[88] इति । ***ईङ्खयन्तीरपस्युवः***[89] इति । ***सञ्ज्ञातरूपश्चिकेतदस्मै***[90] इति । ***सञ्ज्ञानमिन्द्रश्चाग्निश्च***[91] इति । ***तङ्घ्नन्ति*** = ***तंङ्घन्ति*** । ***अञ्जमः*** = ***अंञ्जमः*** । एवमित्यादयः ।

अनुनासिकात्परस्य वर्णस्य द्विरुच्चारणम् – अन्तःस्थासहितस्य संयोगवर्णस्यादौ अनुनासिकवर्णाः रक्तं धारयन्तः विलम्बमानाः सन्तः परवर्तिनं व्यञ्जनं परक्रमं द्विरुच्चारणं कुर्वन्ति इति । नियमस्तु – ***सान्तस्थादौ धारयन्तः परक्रमं शर्मन्स्यामास्मिन्सु जनाच्छुधीयतः***[92] इति । यथा – ***शर्मन्स्याम मरुतामुपस्थे***[93] इति । ***अस्मिन्स्वेतच्छकपूत एनः***[94] इति । ***सं यावप्रस्थो अपसेव जनाञ्छुधीयतः***[95] इति । ***शर्मन्स्याम – शर्मन्स्स्याम, अस्मिन्सु – अस्मिन्स्सु, जनाञ्छुधीयतः – जनाञ्छछुधीयतः*** ।

अनुनासिकैः स्वराणामनुनासिकता – अनुनासिकैः रक्तैः सम्बन्धितत्वात् स्वराणामनुनासिकता विहिता तथा स्वरा अनुनासिकरूपेण उच्चार्यन्ते । सूत्रं तु – रक्तैः रागः समवाये स्वराणां न नूनं नृम्णं नृमणा नृभिर्नॄन्[96] इति । राग अनुनासिकता इति । यथा – न नूनमस्ति नो श्वः[97] इति । नृम्णं तद्धत्तमश्विना[98] इति । नृमणा वीरपस्त्यः[99] इति । कर्हि स्वित्तदिन्द्र यन्नृभिर्नॄन्[100] इति । न नूनम् = नँ नूँनँम् । नृम्णं – नृँम्णँम् । नृमणा – नृँमँणाँ । नृभिर्नॄन् – नृँभिनॄँन् ।

अनुनासिकात्परस्य हकारस्य सोष्मत्वम् – अनुनासिकात् रक्तात् परस्थित ऊष्मवर्णः सोष्मरूपेणोच्चार्यते । यथा – दध्यङ् ह मे जनुषम्[101] इति । देवान् हवत ऊतये[102] इति । दक्षसो महान्हि षः[103] इति । दध्यङ् ह - दध्यङ् घ । देवान् हवत – देवान्धहवत । महान्हि – महान्धि । विषयेऽस्मिन् नियमोऽस्ति – रक्तात्तु सोष्मा क्रियते हकारो दध्यङ् ह देवान्हवते महान्हि[104] इति ।

वर्णानामुच्चारणे अकारस्यापेक्षा – अन्यान् स्वरान् तथा अऋइउ-कारान् अकारस्य करणावस्थया ब्रूयात् । तदर्थमुच्यते – ***अकारस्य करणावस्थयान्यान्स्वरान्ब्रूयात्***[105] इति । अ-कारस्य करणावस्थया इईउऊ-कारान् अन्यान् स्वरान् अपि ब्रूयात् इति सम्पन्नमाहुः । ककारादीनपि व्यञ्जकसंज्ञकान् वर्णान् अकारोदयवत् वक्तुमिच्छेत् । सर्वत्र वर्णान् इति आहुराचार्याः । यथा – क का कि की कु कू इति । तदुच्यते – ***परानकारोदयवद्विवक्षेत् सर्वत्र सर्णानिति सम्पदेषा***[106] इति ।।

इदानीं वाजसनेयिप्रातिशाख्यस्य वर्णोच्चारणविधिः –

अ इत्येवमुच्चारणकालः स्वरः ह्रस्वसंज्ञो भवति । यथा - अ इ उ ऋ ऌ इति । तदुच्यते – ***अमात्रस्वरो ह्रस्वः***[107] इति ।

मात्रा यत्रोच्यते तत्र अकारकालो मात्रास्वरः प्रत्येतव्यः । ह्रस्वमात्रा इति वेदितव्यः ।[108]

---

[85] ऋक्प्रा. – 14.54
[86] ऋ. – 2.17.13
[87] ऋ. – 9.45.3
[88] ऋ. – 9.66.25
[89] ऋ. – 10.153.1
[90] ऋ. – 1.69.5
[91] ऋ.खि. – 10.191.1
[92] ऋक्प्रा. – 14.55
[93] ऋ. – 7.34.25
[94] ऋ. – 10.132.5
[95] ऋ. – 6.67.3
[96] ऋक्प्रा. – 14.56
[97] ऋ. - 1.170.1
[98] ऋ. – 8.9.2
[99] ऋ. – 5.50.4
[100] ऋ. – 6.35.2
[101] ऋ. – 1.139.9
[102] ऋ. – 1.105.17
[103] ऋ. – 8.13.1
[104] ऋक्प्रा. – 14.53
[105] ऋ. – 14.65
[106] ऋ. – 14.67
[107] शु.प्रा. – 1.55
[108] शु.प्रा. – 1.56 (मात्रा च)

ह्रस्वस्वरात् द्विगुणकालवर्णो दीर्घसंज्ञो भवतीति । यथा – आ ई ऊ ॠ ॡ ए ऐ ओ औ इति । तदुच्यते – ***द्विस्तावान् दीर्घः***[109] इति ।

ह्रस्वस्वरात् त्रिगुणकालवर्णो प्लुतसंज्ञको भवतीति । यथा - आ३ ई३ ऊ३ ॠ३ ॡ३ ए३ ऐ३ ओ३ औ३ इति । तदुच्यते – ***प्लुतस्त्रिः***[110] इति ।

सर्वत्रैव व्यञ्जनस्य अर्धमात्राकालः निर्णीतः । विषयेऽस्मिन् वाजसनेयिप्रातिशाख्ये सूत्रितम् – ***व्यञ्जनमर्धमात्रा***[111] इति । यथा – प्राङ्, प्रत्यङ् । ङकारावर्धमात्रौ इति ।

व्यञ्जनस्य अर्धमात्रकमेव प्रसिद्धं सर्वत्रेव । तदर्धम् अर्धमात्रार्धम् अणु-संज्ञकं स्यादिति वाजसनेयिप्रातिशाख्यमतम् । सूत्रितं तु – ***तदर्धमणु***[112] इति ।

पुनः अर्धाणुमात्रा परमाणुसंज्ञा स्यादिति वाजसनेयिप्रातिशाख्यसिद्धान्तः । सूत्रितं तु – ***परमाण्वर्धाणुमात्रा***[113] इति ।

## 6. उभयप्रातिशाख्यस्य वर्णसमाम्नाय-वर्णोच्चारणविधिविषये तुलनात्मकं समीक्षणम्

उपर्युक्तालोचनात एतदेव स्पष्टं यत् वर्णसमाम्नाये तथा स्वरवर्णानां समाम्नाये प्रातिशाख्यद्वयोर्मध्ये महत्पार्थक्यमस्ति । तद्यथा –

ऋग्वेदस्य वर्णसमाम्नाये अकार-आकारात् परं ऋ-ॠकारौ गृहीतौ, तत्परम् इ-ईकारयोः ग्रहणं जातम् । वाजसनेयिप्रातिशाख्ये वर्णा क्रमानुसारेण गृहीताः ।

ऋग्वेदीयप्रातिशाख्ये ऌॡ-कारयोः ग्रहणं न कृतम् परन्तु वाजसनेयिप्रातिशाख्ये ह्रस्व-दीर्घ-प्लुत-ऌकाराणां ग्रहणं कृतम् ।

सन्ध्यक्षरग्रहणेऽपि पार्थक्यं दृष्टम् । ऋग्वेदप्रातिशाख्यानुसारेण तस्य क्रमः ए ओ ऐ औ इति । परन्तु वाजसनेयिप्रातिशाख्ये तस्य क्रमः ए ऐ ओ औ इति ।

ऋग्वेदस्य समाम्नाये प्लुतानां वर्णानां निवेशो न जातः परन्तु वाजसनेयिप्रातिशाख्ये प्लुतवर्णाः गृहीताः ।

ऋग्वेदप्रातिशाख्ये स्वराः द्वादशसंख्यकाः (12) । परन्तु वाजसनेयिप्रातिशाख्ये त्रयोविंशतिसंख्यका (23) इति ।

केवलं त्रिभिः सूत्रैः ऋक्प्रातिशाख्ये स्वरवर्णानां समाम्नायः प्रदर्शितः । परन्तु पञ्चभिः सूत्रैः वाजसनेयिप्रातिशाख्ये स्वरवर्णानां समाम्नायः प्रदर्शित इति ।।

<u>उभययोः प्रातिशाख्ययोः वर्णोच्चारणविधिविषये किञ्चित् पार्थक्यानि सन्ति</u> । तानि तु –

वायु एव वर्णोच्चारणस्य मूलमिति सर्वैर्ज्ञायते । परन्तु ऋक्प्रातिशाख्यमते पञ्चवायुषु प्राणवायु एव वर्णोच्चारणस्य मूलम् । तत्रोच्यते - वायुः प्राणः कोष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते वा ।

आपद्यते श्वासतां नादतां वा वक्त्रीहायाम् ।। अर्थात् य इमे शारीरा इह पञ्च वायवो नानाकर्माणः प्राणापानव्यानोदानसमानास्तेषां प्राणो हि नाभेरुपरिष्टाद्व्यापि आस्ये व्याचरति । एतेषु पञ्चषु वायुषु वाण्योत्पादने उद्युक्तो वायुः तथा वाचि वर्तमानः वायुः प्राण इति केचिदाचार्याः मन्यन्ते । केचित्तु तं वायुं उदान इति मन्यन्ते । आचार्यः परन्तु पूर्वपक्षिणः कथयन्ति – ये खलु आचार्याः वाण्योत्पादने उद्युक्तो वायुः उदान इति मन्यन्ते तेषां कृते शास्त्रमिदं न सिद्धम् उदानाभावात् । सिद्धान्तपक्षिणः कथयन्ति – तेषां कृते च शास्त्रमिदं सिद्धम् । शारीराणां पञ्चानामपि प्राण इति नाम साधारणम् । तस्मात्तेषामपि वायुः प्राणः कोष्ठ्यमनुप्रदानम् इत्येवं सिद्धम् । केन प्रयत्नेन किमनुप्रदानम् आपद्यते इति चेदुच्यते कण्ठस्य गलस्य च बिले छिद्रे विवृते विपुले सति संवृते संकुचिते वा सति शासत्वं नादत्वं वा आपद्यते । विवृतसंवृतौ उभौ कण्ठबिले समे सति वायुः श्वासं नादं चापद्यते । एतयोः श्वास-नादयोर्मेलनं वर्णानां प्रकृतयस्तथा मूलकारणं भवतीति । तदुच्यते – ता वर्णानां प्रकृतयो भवन्ति इति ।

परन्तु वाजसनेयिप्रातिशाख्यानुसारेण वायु एव शब्दस्य मूलकारणम् । तत्र वायोः किञ्चिद्विवरणमपि प्रदत्तम् । ***आकाशाद्वायुः*** इति श्रुत्यनुसारेण वायु आकाशादुत्पद्यते । शब्दस्तदात्मको वाय्वात्मक इति ।[114] यदि वाय्वादिशब्दात्मकः शब्दस्यात् तर्हि वायोः सर्वगतत्वाद् सर्वकालं सर्वशब्दोपलब्धिः स्यादिति आशङ्कायां सूत्रितं ***सङ्करोपहितः***[115] इति । करणानि कराः, समीचीनाः कराः सङ्कराः । सम्यक् करणैरुपहितो वायुः हृदि वेणुशङ्खादिभिः साधनैः शब्दीभवति । यो वायुः वेणुशङ्खादिभिरुपहितः शब्दो भवति, स एव सङ्घातादीन् प्राप्य वागिति व्यवह्रियते । तदुच्यते ***स सङ्घातादीन् वाक्***[116]

---

[109] शु.प्रा. – 1.57
[110] शु.प्रा. – 1.58
[111] शु.प्रा. – 1.59
[112] शु.प्रा. – 1.60
[113] शु.प्रा. – 1.61
[114] शु.प्रा. – 1.6 (वायुः खात्), 1.7 (शब्दस्तत्)
[115] शु.प्रा. – 1.8
[116] शु.प्रा. – 1.9

इति । सङ्घात नाम प्रयत्नस्तथा बाह्यप्रयत्नः । अस्माकं शरीरे वायोः उरःकण्ठमूर्धात्मकानि त्रीणि स्थानानि सन्ति । वायोः संवृतविवृताख्ये द्वे करणे भवतः । ये द्वे करणे, यानि त्रीणि स्थानानि, तानि शरीरान्निर्गच्छतः वायो भवन्ति । शरीरान्निर्गच्छन् वायुः शरीरं तथा कादिवर्णविशेषस्वरूपमापद्यते । किं खलु शरीरात् यस्मात् कस्मात् वायुर्निर्गच्छन् मात्रादिवर्णविशेषव्यक्तिरूपं शरीरमापद्यते इति शङ्कायां सूत्रितं ***शारीरे*** इति । तेषां स्थानकरणप्रयत्नानां समुहादुदयन् उद्गच्छन् स वायुः भूतभविष्यद्वर्तमानरूपं त्रिकालमभिधत्ते । त्रिकालसम्बद्धस्यार्थजातस्य वायुः शब्दरूपेण प्रकाशको भवतीति । तदुच्यते तेषां समूहान् स उदयँस्त्रैकाल्यम् इति ।

वाजसनेयिप्रातिशाख्यानुसारेण वर्णानां निर्देश इतिना भवति । ऋक्प्रातिशाख्ये नियमोऽयं नास्ति ।

कारेण तथा कारप्रत्ययेन च वर्णानां निर्देशो भवति वाजसनेयिप्रातिशाख्ये । परन्तु अनुस्वारयमविसर्जनीयजिह्वामूलीयोपध्मानीयाः कारप्रत्ययेन न निर्देष्टव्याः, स्वशब्देनैव निर्देष्टव्या इति । ऋक्प्रातिशाख्ये नियमोऽयं नास्ति ।

श्वास एव अघोषवर्णानां, नादस्तु इतरेषां वर्णानां प्रकृतिर्भवतीति ऋग्वेदप्रातिशाख्यतो वेदितव्यम् । वाजसनेयिप्रातिशाख्ये नियमोऽयं नास्ति ।

सोष्मोवर्णानां घोषवर्णानां च प्रकृतिर्भवति श्वासनादौ उभयौ इति ऋक्प्रातिशाख्यमतम् । वाजसनेयिप्रातिशाख्ये नियमोऽयं नास्ति ।

ऋक्प्रातिशाख्यानुसारम् आभ्यन्तरप्रयत्नः त्रिधा विभज्यते – स्पृष्टम्, अस्पृष्टम्, ईषत्पृष्टं चेति । अस्थितं नाम स्पृष्टं, स्थितं नाम अस्पृष्टं, दुष्पृष्टं नाम ईषत्स्पृष्टम् ।[117] परन्तु वाजसनेयिप्रातिशाख्यानुसारं आभ्यन्तरप्रयत्नः षड्विधः – संवृतता, विवृतता, अस्पृष्टता, स्पृष्टता, ईषत्स्पृष्टता, अर्धस्पृष्टता[118] चेति ।

ऋग्वेदप्रातिशाख्ये अनुस्वारस्योच्चारणं विशदीकृतम् । अनुस्वारस्योच्चारणविषये आचार्यस्य व्याळेर्मतमपि तत्र प्रदर्शितम् । परन्तु केवलं नासिकया उच्चार्यते इति वाजसनेयिप्रातिशाख्ये कथितम् ।

शाकटायनाचार्यस्य मतमुल्लिख्य ऋग्वेदप्रातिशाख्ये सन्ध्यक्षराणामुच्चारणप्रक्रिया विशदीकृतम् । वाजसनेयिप्रातिशाख्ये केवलं त्रिभिः सूत्रैः (1.66, 70, 73) सन्ध्यक्षराणामुच्चारणप्रक्रिया वर्णितम् ।

वर्णानामुच्चारणसमये जिह्वा कीदृशी भवति तत्तु वाजसनेयिप्रातिशाख्ये उल्लिखितं, परन्तु ऋक्प्रातिशाख्ये नास्ति ।

अविद्यमानस्य ह्रस्वस्वरस्योच्चारणं, अविद्यमानस्य यकारस्योच्चारणं, अविद्यमानस्य ऊष्मण उच्चारणम्, अधिकयमस्योच्चारणम्, अनुनासिकात्परस्य वर्णस्य द्विरुच्चारणम्, अनुनासिकैः स्वराणामनुनासिकता, अनुनासिकात्परस्य हकारस्य सोष्मत्वम्, वर्णानामुच्चारणे अकारस्यापेक्षा इति विषयान् अधिकृत्य ऋक्प्रातिशाख्ये आलोचिताः, परन्तु वाजसनेयिप्रातिशाख्ये नालोचिता इति ।

## 7. उपसंहार

ऋग्यजुस्सामाथर्वभेदेन चतुर्धा प्रविभक्तः खल्वयमस्माकं धर्मग्रन्थो वेदः । स एव बहुशाखासमाहारात्मकोऽस्ति । वेदस्यास्य लक्षणग्रन्ततया प्रातिशाख्यं विद्वज्जनसमाजे सर्वासु दिक्षु समादृतम् । प्रातिशाख्येनानेन वेदस्यास्य बाह्यस्वरूपं प्रकाशितं नितराम् । प्रतिवेदानां शाखाविशेषमवलम्ब्य तद्गतस्वरसन्ध्यादीनामनुशासनाय प्रवृत्तं शास्त्रं प्रातिशाख्यमित्यभिधायते । वैदिकसंहिताः ध्वनितत्त्वोच्चारणनियमान् यथायथं निर्दिशन्ति । प्रातिशाख्ये तु संहितापदपाठसन्धिस्वरादीनामालोचना निर्दिष्टा । प्रातिशाख्यमन्तरेण वर्ण-स्वर-मात्रा-सन्धि-छन्दःप्रभृतिविशिष्टविषयाणां ज्ञानाभावे वेदमन्त्राणां शुद्धमुच्चारणं दुरूहमेव प्रतीयते । वैदिकमन्त्राणामर्थप्रतिबोधाय प्रयत्ननिर्णयावसरे शिक्षा-व्याकरणविषयपरस्वरूपप्रतिपत्तये परमामुपयोगितां भजते प्रातिशाख्यशास्त्रम् । शाखाविशेषनियमज्ञानाय वर्ण-स्वर-मात्रादिलक्षणलक्षिततया साङ्गोपाङ्गादिवेदाध्ययनं विशेषेण प्रतिपादयति शास्त्रमेतत् ।

गवेषणापत्रऽस्मिन् ऋक्शाखायाः शुक्लयजुर्वेदस्य वाजसनेयिशाखायाश्च वर्णसमाम्नायो वर्णोच्चारणविधिश्च ससूत्रं सोदाहरणं च यथामति प्रस्तूयेते । विषयद्वयमवलम्ब्य या खलु तुलनात्मका समीक्षा अत्र प्रस्तुता, तया खलु परवर्तिकालिनः शोधछात्राः सविशेषमुपकृताः भवन्तीति मन्यते इति शम् ।।

## 8. शब्दसंक्षेपसूची

| | | |
|---|---|---|
| ऋ. – ऋग्वेदः | ऋक्प्रा. – ऋक्प्रातिशाख्यम् | पा.शि. – पाणिनीयशिक्षा |
| मनु. – मनुसंहिता | शु.प्रा. – शुक्लयजुर्वेदप्रातिशाख्यम् | |

[117] ऋक्प्रा. – 13.8-11

[118] शु.प्रा. – 1.72 (उवटभाष्यम्)

## ग्रन्थपञ्जी


अथर्ववेदप्रातिशाख्य तथा वाजसनेयिप्रातिशाख्य का तुलनात्मक अध्ययन । बीना जलोटे । वाराणसी : न्यु साकेत कालोनी, २००२.

अष्टाध्यायी । चन्द्रलेखा हिन्दीव्याख्यायुताऽनेकोपयोगिविषयैरूपबृंहिता सूत्रपाठ-सूत्रवार्तिकोदाहरणानां सूच्या चान्विता । मदर्षि-पाणिनिः । व्याख्याकारः-ईश्वरचन्द्रः । प्रथम-द्वितीयभागः, व्रजजीवन प्राच्यभारती ग्रन्थमाला १०३, दिल्लीः चोखम्बा संस्कृत प्रतिष्ठान, २००४.

ऋग्वेदप्रातिशाख्यम्, उवट-भाष्य-सहितम् । सम्पा. सिद्धेश्वर-भट्टाचार्यः । काशी हिन्दू विश्वविद्यालय संस्कृत ग्रन्थमाला । शोध-प्रकाशन-योजना । पञ्चम-पुष्पः, वाराणसी : काशी हिन्दू विश्वविद्यालय शोध-प्रकाशन, १९३०।

ऋग्वेदप्रातिशाख्यम्, उवट-भाष्य-सहितम् । सम्पा. मङ्गलदेव-शास्त्री । एलाहवाद : द्य इण्डियान प्रेस लिमिटेड, 1931.

ऋग्वेदप्रातिशाख्यम् शौनकविचरितम् । पशुपतिशास्त्रिकृतटीकासमेतम् । सम्पादकोऽनुवादको व्याख्याकारश्च : अमरकुमार चट्टोपाध्यायः । कोलकाता : संस्कृत पुस्तक भाण्डार, २००८ ।

ऋग्वेगप्रातिशाख्य । पटल १ – ४ । व्याख्याकार – व्रजबिहारी चौवे । दिल्ली : भारतीय विद्या प्रकाशन, १९८६ ।

तैत्तिरीयप्रातिशाख्यम्, सोमयार्यविरचित-त्रिभाष्यरत्नाख्यव्याख्यया गार्ग्यगोपालयज्वविरचित-वैदिकभरणाख्य-व्याख्याया च सहितम् । सम्पादकौ - आर् श्यामशास्त्री-के.रङ्गाचार्यौ । दिल्ली : मोतीलाल बनारसी दास, १९८५ (पुनर्मुद्रितसंस्करणम्) ।

पाणिनीयव्याकरण-प्रातिशाख्ययोस्तुलनात्मकमध्ययनम् । विनोद-कुमार-मिश्रः । दिल्ली : विद्यानिधिप्रकाशन, 2011.

वाजसनेय-प्रातिशाख्य एक परिशीलन । कुलपति मण्डन मिश्र की प्रस्तावना से अलङ्कृत । लेखकः सम्पादकश्च युगल किशोर मिश्र । विश्वविद्यालय-रजत-जयन्ती-ग्रन्थमाला – खण्ड २० । वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय, १९९७ ।

शुक्लयजुःप्रातिशाख्यम्, कात्यायनमहर्षिप्रणीतम्, उवटभाष्यसहितम् । सम्पा. युगलकिशोरपाठकः । वेनारस सान्सक्रिट सिरिज । ए कलकशन अव सान्सक्रिट वार्कस । संख्या – 8,10,18,21,26. वेनारस, 1883.

शुक्लयजुःप्रातिशाख्यम् अथवा वाजसनेयि-प्रातिशाख्यम्, भाष्यद्वयसहितम् । सम्पा. वीरेन्द्र-कुमार-वर्मा । वाराणसी : ज्ञानप्रकाश प्रतिष्ठान, 1975.

शुक्लयजुःप्रातिशाख्यम् अथवा वाजसनेयि-प्रातिशाख्यम्, भाष्यद्वयसहितम् । सम्पा. वीरेन्द्र-कुमार-वर्मा । व्रजजीवन प्राच्यभारती ग्रन्थमाला 16 । दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, पुनर्मुद्रितसंस्करणम्, 1987.

शौनकीय ऋग्वेगप्रातिशाख्य (प्रथमतश्चतुर्थपटलं यावत्, षोडशपटलञ्च) । सम्पा.- तारकनाथ अधिकारी । कोलकाता : संस्कृत वुक डिपो, २००७.

A Critical And Comparative Study Of The Pratisakhyas. Chhaya Banerji (Bhattacharya). Kolkata : Sanskrit Pustak Bhandar, 2009.

A Critical Linguistic Study Of The Pratishakhyas. Sukla Chakrabarti. Calcutta : Punthi-Pustak, 1996.

Dictionary Of The Technical Terms Of Pratisakhya. Shivkumar Mishra, Shailkumari Mishra, Ramnarayan Mishra and Banamali Bishval. Allahabad : Ganganath jha Kendriya Sanskrit Vidyapeetha, 2015.

Panini And Pratisakhya : A Comparative Study in Etymological and Grammatical Approach . Pradyot Kumar Datta. Calcutta : Sanskrit Pustak Bhandar, 1994.

Studies On The Siksa-s And The Pratisakhya-s. Ed. – Bhagyalata Pataskar. Funded by Vaidika Samshodhana Mandala, Pune. New Delhi : Rashtriya Sanskrit Samsthan, 2010.

Sukla Yajurveda Pratishakhyam or Vajasaneyi Pratisakhyam. Ed. Virendra Kumar Barma. Vrajajivan Pracyabharati Granthamama 16. Delhi : Chaukhamba Sanskrit Pratisthan, 2010.